**<u>प्रेरणार्थे णिच् – विशेषाः अजन्तधातवः</u>**

गते करपत्रे सामान्यण्यन्तधातवः अवलोकिताः | अधुना विशेषधातवः परिशीलनीयाः | अस्मिन् करपत्रे विशेषाः अजन्तधातवः वीक्ष्यन्ते; अग्रिमे करपत्रे विशेषाः हलन्तधातवः दृश्यन्ताम् |

तर्हि अधुना क्रमेण अजन्तधातवः दृश्येरन्— आकारान्ताः, एजन्ताः, इ/ईकारान्ताः, उ/ऊकारान्ताः, ऋ/ॠकारान्ताः | एजन्तधातवः आकारान्तैः साकं क्रियन्तां यतोहि, यथा बुद्धं गते करपत्रे, तेषाम् आत्वं तु भवति एव | अकारान्तधातवः (इत्युक्ते अदन्ताः) हलन्तधातुषु पश्येम यतोहि तेषाम् अकारलोपः भवति अतः ते हलन्तधातुभिः तुल्याः |

**A**. **<u>आकारान्तधातवः</u>**

१) <u>एजन्तधातवः</u>

एतावता ज्ञातं यत् सर्वे एजन्तधातवः णिच्-प्रकरणे आकारान्ताः भवन्ति **आदेच उपदेशेऽशिति** (६.१.४५) इति सूत्रेण | एचः स्थाने आत्वम् उपदेशे अशिति इति | आकारान्ताः भूत्वा पुगागमः प्राप्यते **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इत्यनेन | एजन्तेषु केचन परिगणिताः सन्ति ये **शाच्छासाह्वाव्यावेपां युक्** (७.३.३७) इति सूत्रेण पुगागमस्थाने युगागमं प्राप्नुवन्ति | सामान्यस्थितिः तथा; अत्र द्वौ धातू स्तः यौ अर्थम् अनुसृत्य भिन्नरूपमपि प्राप्नुतः—

अ) गतपाठे अवलोकितेषु एजन्तेषु एकः पै-धातुः आसीत् | तस्य गतिः प्रदर्शिता एवम्—

पै शोषणे → **हेतुमति च** (३.१.२६) इत्यनेन प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोः णिच् → पै + णिच् → **आदेच उपदेशेऽशिति** (६.१.४५) → पा + इ → **शाच्छासाह्वाव्यावेपां युक्** (७.३.३७) → पा + युक् + इ → पायि इति णिजन्तधातुः → पाययति

पा पाने → पा + युक् + णिच् → पायि → पाययति

अधुना ततः अग्रे अदादिगणे एकः पा-धातुः रक्षणार्थे अपि भवति (लटि 'पाति') | रक्षणार्थे एकं वार्तिकं कार्यं करोति **लुगागमस्तु तस्य वक्तव्यः** इति | अनेन वार्तिकेन युकः स्थाने लुक् आयाति |

पा रक्षणे → **लुगागमस्तु तस्य वक्तव्यः** इति वार्तिकेन रक्षनार्थे लुक्-आगमः → पा + लुक् + णिच् → पालि → पालयति

**शाच्छासाह्वाव्यावेपां युक्** (७.३.३७) इति सूत्रेण पा रक्षणे वर्जयित्वा सर्वेषां पा-धातूनां ग्रहणम्— नाम पै शोषणे, पा पाने च |

आ) एषु एजन्तेषु एकः वै शोषणे इति धातुः भ्वादिगणीयः, लटि वायति | शुष्कं करोति इत्यर्थः |

अयं वै-धातुः णिचि परे आत्त्वम् इति कृत्वा वा भवति, तदा **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इत्यनेन पुगागमः |

वै शोषणे → प्रेरणार्थे णिचि → वै + णिच् → **आदेच उपदेशेऽशिति** (६.१.४५) इत्यनेन अशिति आत्त्वम् → वा + इ → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इत्यनेन आकारान्तानां पुगागमः → वा + पुक् + इ → वापि इति णिजन्तधातुः → वापयति |

वै-धातुः 'कम्पयति' इत्यस्मिन् अर्थे पुक्-स्थाने जुक् आगमं प्राप्नोति, **वो विधूनने जुक्** (७.३.३८) इति सूत्रेण |

वै कम्पनार्थे → प्रेरणार्थे णिचि → वै + णिच् → **आदेच उपदेशेऽशिति** (६.१.४५) इत्यनेन अशिति आत्त्वम् → वा + इ → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इत्यनेन आकारान्तानां पुगागमः → कम्पनर्थे **वो विधूनने जुक्** (७.३.३८) इत्यनेन पुगागमं प्रबाध्य जुक्-आगमः → वा + जुक् + इ → वाजि इति णिजन्तधातुः → वाजयति

**वो विधूनने जुक्** (७.३.३८) = णिचि परे विधूनने, नाम कर्म्पनार्थे, वै-धातोः जुक्-आगमः | अशिति वै-धातोः आत्त्वं; वा इत्यस्य षष्ठ्यन्तं रूपं 'वः' | वः षठ्यन्तं, विधूनने सप्तम्यन्तं, जुक् प्रथमान्तं, त्रपदमिदं सूत्रम् | **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इत्यस्मात् **णौ** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **वः अङ्गस्य जुक् णौ विधूनने** |

२) <u>ला-धातुः</u>

अदादिगणे ला-धातुः, लट्-लकारे लाति इति रूपम् | अर्थः = लभते, स्वीकरोति इति |

**लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने** (७.३.३९) = णिचि परे स्नेहविपातने, विकल्पेन ली-धातोः नुक्, ला-धातोः लुक् च | तदभावे पुक् | स्नेहः नाम तैलं, घृतं; विपातनं नाम to melt, dissolve | स्नेहविपातनार्थे णिचि, ली-धातोः नुगागमः, ला-धातोः लुगागमः च विकल्पेन भवति | लीश्च लाश्च लीलौ, द्वन्द्वः; तयोर्लीलोः | नुक् च लुक् च नुग्लुकौ, द्वन्द्वः | स्नेहस्य विपातनं स्नेहविपातनं, तस्मिन् स्नेहविपातने, षष्ठीतत्पुरुषः | लीलोः षष्ठ्यन्तं, नुग्लुकौ प्रथमान्तम्, अन्यतरस्यां सप्तम्यन्तं, स्नेहविपातने सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ** (७.३.३६) इत्यस्मात् **णौ** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **लीलोः अङ्गस्य नुग्लुकौ णौ स्नेहविपातने अन्यतरस्याम्** |

धेयं यत् 'विकल्पेन' इत्यस्मिन् अर्थे पाणिनीयसूत्रेषु इमानि पदानि लभ्यन्ते— विभाषा, वा, बहुलम्, अन्यतरस्याम् इति | 'अन्यतर' इत्युक्ते 'any, either' |

ला + णिच् → ला + लुक् + णिच् → ला + ल् + इ → लालि इति णिजन्तधातुः → लालयति

लुगभावे **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इत्यनेन पुगागमः—

ला + णिच् → ला + पुक् + णिच् → लापि इति णिजन्तधातुः → लापयति

ली–धातोः नुक् अग्रे ईकारान्तेषु वक्ष्यमाणम् |

३) अर्थविशेषे मित् आकारान्तधातवः—ज्ञा, ग्ला, स्ना, श्रा

**अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इत्यनेन आकारान्तधातूनां पुगागमः |

**मितां ह्रस्वः** (६.४.९२) इत्यनेन ये धातवः मितः, तेषाम् उपधायां स्वरः ह्रस्वः भवति णिचि प्रत्यये परे |

**मितां ह्रस्वः** (६.४.९२) = मित्–धातूनाम् उपधायाः स्वरः ह्रस्वः भवति, णिच्–प्रत्यये परे | मित् कश्चन अन्तर्गणः | भ्वादिगणे घटादयः उपगणः मित्–अन्तर्गणे सन्ति, अपि च चुरादिगणे ज्ञपादयः षट् धातवः मित्–अन्तर्गणे सन्ति | मितां षष्ठ्यन्तं, ह्रस्वः प्रथमान्तं, द्विपमिदं सूत्रम् | **ऊदुपधाया गोहः** (६.४.८९) इत्यस्मात् **उपधायाः** इत्यस्य अनुवृत्तिः | **दोशो णौ** (६.४.९०) इत्यस्मात् **णौ** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **मिताम् अङ्गानाम् उपधायाः ह्रस्वः णौ** |

भ्वादिगणे घटादयः इति उपगणे ४४ धातवः; **घटादयो मितः** इति गणसूत्रेण एते धातवः मित् सन्ति | तदा चुरादिगणे ज्ञपादयः षट् धातवः मित्–अन्तर्गणे सन्ति— ज्ञप, यम, चह, रह, बल, चिञ् |

ज्ञप ज्ञानज्ञापन–मारणतोषणे = सूचयति, जयति, मारयति, प्रसन्नः भवति
यम परिवेषणे = नियमयति, नियन्त्रणं करोति
चह परिकल्कने = वञ्चयति
रह त्यागे = त्यजति, जहाति
बल प्राणने = जीवति; पोषणं करोति
चिञ् चयने = सङ्ग्रहणं करोति

ज्ञप → ज्ञप् + इ → **अत उपधायाः** (७.२.११६) → ज्ञापि → **मितां ह्रस्वः** (६.४.९२) → ज्ञपि इति णिजन्तधातुः → ज्ञपय → ज्ञपयति/ते
यम → यम् + इ → यामि → यमि इति णिजन्तधातुः → यमय → यमयति/ते
चह → चह् + इ → चाहि → चहि → चहय → चहयति/ते
रह → रह् + इ → राहि → रहि → रहय → रहयति/ते
बल → बल् + इ → बालि → बलि → बलय → बलयति/ते
चिञ् → चि + इ → **अचो ञ्णिति** → चै + इ → चायि → चयि → चयय → चययति/ते

तदा केचन धातवः अर्थविशेषे मित्–धातवः भवन्ति | यथा—

स्मृ–धातुः यदा आध्यानार्थे तदा मित्, 'स्मरयति' | अन्यत्र 'स्मारयति' |
दॄ–धातुः भयार्थे दरयति | अन्यत्र यथा विदारणार्थे दारयति |

एवं रीत्या चत्वारः आकारन्ताः अर्थविशेषे मित्–धातवः सन्ति— श्रा, ज्ञा, ग्ला, स्ना ।

श्रा पाके, पाकार्थे अपि भवति, स्वेदनार्थे अपि भवति । पाकार्थे मित्, स्वेदनार्थे मित् न । अतः श्रपयति इत्युक्ते विक्लेदयति, मृदुं कारयति । श्रापयति इत्युक्ते स्वेदयति, स्वेदनं कारयति ।

श्रा + णिच् → श्रा + पुक्  + इ → श्रापि → **मितां ह्रस्वः** → श्रपि इति णिजन्तधातुः → श्रपयति

**ज्ञा मारणतोषणनिशामनेषु** । मारणम् इत्यनेन हिंसा, तोषणाम् इत्यनेन सन्तुष्टिः, निशामनम् इत्यनेन चाक्षुषज्ञानम् । एषु अर्थेषु **मितां ह्रस्वः** (६.४.९२) इत्यनेन ह्रस्वत्वम्; अन्यत्र दीर्घत्वम् । दुर्जनं संज्ञपयति इत्यनेन दुर्जनं मारयति । हरिं ज्ञपयति इत्यनेन हरिं संतोषयति । रूपं ज्ञपयति इत्यनेन दर्शयति, बोधयति । किन्तु सूचनां ददाति इति चेत् ज्ञापयति ।

ज्ञा + णिच् → ज्ञा + पुक्  + इ → ज्ञापि → **मितां ह्रस्वः** → ज्ञपि → ज्ञपयति

तथैव—

ग्ला + णिच् → ग्ला + पुक् + इ → ग्लापि → **मितां ह्रस्वः** → ग्लपि इति णिजन्तधातुः → ग्लपयति
स्ना + णिच् → स्ना + पुक् + इ  → स्नापि → **मितां ह्रस्वः** → स्नपि → स्नपयति

**B**. <u>इकारान्तधातवः</u>

सामान्यव्यवस्था **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः, **एचोऽयवायावः** (६.१.७७) इत्यनेन आय् आदेशः । नी → नाययति । यावन्तः इकारान्तधातवः ईकारान्तधातवः च अपवादभूताः सन्ति, तेषां वर्णनम् अधः भवन्ति । कोऽपि धातुः अधः सूचितः नास्ति चेत्, तर्हि सामान्यरूपेण एव तस्य ण्यन्तरूपव्युत्पत्तिः इति बोध्यम् ।

१) <u>क्री, जि, अधि + इ  इति धातवः</u>

क्री = क्र्यादिगणे । लटि क्रीणाति ।
जि = भ्वादिगणे । लटि जयति ।
अधि + इ = इङ् अध्ययने नित्यम् अधिपूर्वः । अदादिगणे । लटि अधीते ।

**क्रीङ्जीनां णौ** (६.१.४८) = णिचि परे एषां धातूनाम् एचः स्थाने आ–आदेशो भवति । क्रीश्च इङ् च जिश्च तेषामितरेतरद्वन्द्वः क्रीङ्जिस्तेषां क्रीङ्जीनाम् । क्रीङ्जीनां षष्ठ्यन्तं, णौ सप्तम्यन्तं, द्विपदमिदं सूत्रम् । **आदेच उपदेशेऽशिति** (६.१.४५) इत्यस्मात् **आत्, एचः** इत्यनयोः अनुवृत्तिः भवति । अनुवृत्ति–सहितसूत्रम्— **क्रीङ्जीनां एचः आत् णौ** ।

क्री + णिच् → **अचो ञ्णिति** इत्यनेन वृद्धिः → क्रै + इ → **क्रीङ्जीनां णौ** इत्यनेन एचः स्थाने आ–आदेशः → क्रा + इ → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इत्यनेन पुक्–आगमः → क्रा + पुक् + इ → क्रापि इति णिजन्तधातुः → क्रापयति
जि + णिच् → **अचो ञ्णिति** इत्यनेन वृद्धिः → जै + इ → **क्रीङ्जीनां णौ** इत्यनेन एचः स्थाने आ–आदेशः → जा + इ → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इत्यनेन पुक्–आगमः → जा + पुक् + इ → जापि इति णिजन्तधातुः → जापयति
अधि + इ + णिच् → **अचो ञ्णिति** इत्यनेन वृद्धिः → अध्यै + इ → **क्रीङ्जीनां णौ** इत्यनेन एचः स्थाने आ–आदेशः → अध्या + इ → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इत्यनेन पुक्–आगमः → अध्या + पुक् + इ → अध्यापि इति णिजन्तधातुः → अध्यापयति

अत्र एकः प्रश्नः उदेति— ण्यन्तप्रकरणे इकारान्तानाम् ईकारान्तानाम् णिचि परे **अचो ञ्णिति** इत्यनेन वृद्ध्यनन्तरम् **आदेच उपदेशेऽशिति** (६.१.४५) इति सूत्रेण प्रभावः किमर्थं न स्यात् | यदा इकारान्त/ईकारान्तधातुः एजन्तधातुः जातः, तदा किमर्थम् **आदेच उपदेशेऽशिति** इत्यनेन एव ऐकारस्य आकारादेशः न स्यात् ? किमर्थम् अत्र नूतनसूत्रस्य (**क्रीङ्जीनां णौ** इत्यस्य) आवश्यकता अस्ति ? यथा क्रै + इ इत्यस्यां दशायाम् **आदेच उपदेशेऽशिति** (६.१.४५) इत्यनेन एव क्रा + इ भवतु | अत्र एचः आत् जातम्, अपि च अशित् णिच्–प्रत्ययः परोऽस्ति | परन्तु, एका समस्या अस्ति— क्रै उपदेशः नास्ति, इत्युक्ते मूलधातुरूपं नास्ति | सूत्रे 'उपदेशे' इति दत्तम् अस्ति, अतः यत्र मूले एजन्तधातुः अस्ति, तत्रैव सूत्रस्य प्रसक्तिः, नान्यत्र | अतः **क्रीङ्जीनां णौ** (६.१.४८) इत्यस्य आवश्यकता, अपि च अधः यावन्ति तुल्यसूत्राणि, तेषामपि |

अत्र **क्रीङ्जीनां णौ** (६.१.४८) इत्यादिनां सूत्राणां सङ्ख्याम् अवलोकताम् | **आदेच उपदेशेऽशिति** (६.१.४५) इत्यस्य अनन्तरम् अनेकानि सूत्राणि सन्ति यैः, येषाम् उपदेशावस्थायाम् एजन्तत्वं नास्ति, तेषाम् अपि आत्वं विधीयते |

२) <u>ली–धातुः</u>

ली = भ्वादिगणे लयति (to melt), दिवादिगणे लीयते (to be dissolved), क्र्यादिगणे लिनाति (to melt), प्रेरणार्थे लीनयति, लापयति (to melt)

**लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने** (७.३.३९) = णिचि परे स्नेहविपातने, विकल्पेन ली–धातोः नुक्, ला–धातोः लुक् च | तदभावे पुक् | स्नेहः नाम तैलं, घृतं; विपातनं नाम to melt, dissolve | स्नेहविपातनार्थे णिचि, ली–धातोः नुगागमः, ला–धातोः लुगागमः च विकल्पेन भवति | लीश्च लाश्च लीलौ, द्वन्द्वः; तयोर्लीलोः | नुक् च लुक् च नुग्लुकौ, द्वन्द्वः | स्नेहस्य विपातनं स्नेहविपातनं, तस्मिन् स्नेहविपातने, षष्ठीतत्पुरुषः | लीलोः षष्ठ्यन्तं, नुग्लुकौ प्रथमान्तम्, अन्यतरस्यां सप्तम्यन्तं, स्नेहविपातने सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ** (७.३.३६) इत्यस्मात् **णौ** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **लीलोः अङ्गस्य नुग्लुकौ णौ स्नेहविपातने अन्यतरस्याम्** |

नुक्–आगमे—
ली + णिच् → ली + नुक् + इ → लीनि → लीनयति

नुगभावे—

**विभाषा लीयतेः** (६.१.५१) = ली, लीङ् इति धात्वोः विकल्पेन आकारादेशो भवति एचः विषये ल्यपि परे च | 'लीयतेः' इति यक्–प्रत्यययुक्तं रूपं (न तु श्यन्–प्रत्यययुक्तम्) इत्यस्मात् क्र्यादिगणीयः अपि च दिवादिगणीयः, द्वयोरपि धात्वोः ग्रहणम् | पूर्वतने सूत्रे 'एचः' इत्यस्य 'एचः विषये' इत्यर्थः अस्ति इत्यस्मात् अस्मिन् सूत्रेऽपि तथा | विभाषा प्रथमान्तं, लीयतेः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **आदेच उपदेशेऽशिति** (६.१.४५) इत्यस्मात् **आत्, एचः** इत्यनयोः अनुवृत्तिः | **मिनातिमिनोतिदीङां ल्यपि च** (६.१.५०) इत्यस्मात् **ल्यपि** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **विभाषा लीयतेः आत् एचः ल्यपि** |

ईकारस्य वृद्धिः भवति ऐकारः, तदा ऐकारस्य स्थाने आ–आदेशो भवति | तदा **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इत्यनेन पुगागमः |

ली + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः → लै + इ → **विभाषा लीयतेः** (६.१.५१) इत्यनेन एचः स्थाने आ–आदेशः → ला + इ → ला + पुक् + इ → ला + प् + इ → लापि इति णिजन्तधातुः → लापयति

नुगभावे, अपि च आ–आदेशाभावे, **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः, तदा **एचोऽयवायावः** इत्यनेन आय्–आदेशः—

ली + णिच् → लै + इ → लाय् + इ → लायि इति णिजन्तधातुः → लाययति

३) <u>चि–धातुः</u>

चि चयने स्वादिगणे | लटि चिनोति/चिनुते |

**चिस्फुरोर्णौ** (६.१.५४) = विकल्पेन चि, स्फुर् इति धात्वोः एचः स्थाने आ–आदेशो भवति णौ | णौ इति अनुबन्धरहितत्वेन णिचि णिङि च भवति | चिश्च स्फुर् च तयोरितरेतरद्वन्द्वः चिस्फुरौ, तयोः चिस्फुरोः | चिस्फुरोः षष्ठ्यन्तं, णौ सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **आदेच उपदेशेऽशिति** (६.१.४५) इत्यस्मात् **आत्, एचः** इत्यनयोः अनुवृत्तिः | **विभाषा लीयतेः** (६.१.५१) इत्यस्मात् **विभाषा** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **विभाषा चिस्फुरोः एचः आत् णौ** |

आ–आदेशे—
चि + णिच् → **अचो ञ्णिति** (७.२.११५) → चै + इ → **चिस्फुरोर्णौ** (६.१.५४) इत्यनेन ऐ–स्थाने आ → चा + इ → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इत्यनेन पुगागमः → चाप् + इ → चापि इति णिजन्तधातुः → चापयति
आ–आदेशाभावे—
चि + णिच् → **अचो ञ्णिति** (७.२.११५) → चै + इ → **एचोऽयवायावः** (६.१.७७) इत्यनेन आय्–आदेशः → चाय् + इ → चायि इति णिजन्तधातुः → चाययति

चि चुरादिगणे **नान्ये मितोऽहेतौ** इति सूत्रेण मित्, अतः **मितां ह्रस्वः** इत्यनेन उपधायां स्वरः ह्रस्वः भवति |
आ–आदेशे—
चि + णिच् → **अचो ञ्णिति** (७.२.११५) → चै + इ → **चिस्फुरोर्णौ** (६.१.५४) इत्यनेन आ–आदेशः → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां**

**पुङ्णौ** (७.३.३६) इत्यनेन पुगागमः → चापि → **मितां ह्रस्वः** → चपि → चपयति
आ-आदेशाभावे—
चि + णिच् → **अचो ञ्णिति** → चै + इ → **एचोऽयवायावः** (६.१.७७) → चाय् + इ → चायि → **मितां ह्रस्वः** → चयि → चययति

४) <u>वी-धातुः</u>

वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु, अदादिगणे | लट्-लकारे वेति | अर्थः = गच्छति, जन्यते च; णिचि अनेके अर्थाः; तेषु एकः अर्थः = प्रजनयति

**प्रजने वीयतेः** (६.१.५५) इत्यनेन प्रजनार्थे आ-आदेशः विकल्पेन भवति णिच्-प्रत्यये परे | तदा **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इत्यनेन पुगागमः |

**प्रजने वीयतेः** (६.१.५५) = प्रजनार्थे, विकल्पेन वी-धातोः एचः स्थाने आकारादेशो भवति णौ परे | प्रजने सप्तम्यन्तं, वीयतेः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **आदेच उपदेशेऽशिति** (६.१.४५) इत्यस्मात् **आत्, एच्** इत्यनयोः अनुवृत्तिः | **चिस्फुरोर्णौ** (६.१.५४) इत्यस्मात् **णौ** इत्यस्य अनुवृत्तिः; **विभाषा लीयतेः** (६.१.५१) इत्यस्मात् **विभाषा** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **प्रजने विभाषा वीयतेः एचः आत् णौ** |

यद्यपि वी-धातुः अपि, अन्ये विशेषाः इकारान्ताः ईकारान्ताः धातवः इव एजन्तः नास्ति, तथापि प्रक्रियायां वृद्ध्यादेशेन एच् आयाति | णिचि परे **अचो ञ्णिति** इत्यनेन वृद्धिः | यथा—

वी + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः → वै + इ → ईकारान्तः वी-धातुः एजन्तः जातः → **प्रजने वीयतेः** (६.१.५५) इत्यनेन प्रजनार्थे आकारादेशः → वा + इ → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) → वा + पुक् + इ → वापि इति णिजन्तधातुः → वापयति

प्रजनार्थे आत्त्वाभावे—

वी + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धि → वै + इ → **एचोऽयवायावः** (६.१.७७) → वाय् + इ → वायि → वाययति

प्रजनार्थे नास्ति चेत्—
वी + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धि → वै + इ → **एचोऽयवायावः** (६.१.७७) → वाय् + इ → वायि → वाययति

५) <u>भी-धातुः</u>

भी भये जुहोत्यादिगणे | लटि बिभेति |

**बिभेतेर्हेतुभये** (६.१.५६) = बिभेतेरेचः णौ आत्त्वं वा स्यात्प्रयोजकाद्भयं चेत् | प्रयोजकात् साक्षात् भीतिः अस्ति चेत्, भी–धातोः अन्त्यस्य एचः स्थाने आ–आदेशो विकल्पेन भवति णौ परे | हेतोर्भयं, हेतुभयं, तस्मिन् हेतुभये, पञ्चमीतत्पुरुषः | बिभेतेः षष्ठ्यन्तं, हेतुभये सप्तम्यन्तम्, द्विपदमिदं सूत्रेम् | **आदेच उपदेशेऽशिति** (६.१.४५) इत्यस्मात् **आत्, एच्** इत्यनयोः अनुवृत्तिः | **चिस्फुरोर्णौ** (६.१.५४) इत्यस्मात् **णौ** इत्यस्य अनुवृत्तिः; **विभाषा लीयतेः** (६.१.५१) इत्यस्मात् **विभाषा** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **विभाषा हेतुभये बिभेतेः एचः आत् णौ** |

**भीस्म्योर्हेतुभये** (१.३.६८) = प्रयोजकात् साक्षात् भीतिः चेत्, भी–धातुः स्मि–धातुः च आत्मनेपदिनौ भवतः | भीश्च स्मिश्च भीस्मी, तयोर्भीस्म्योः | हेतोर्भयं हेतुभयं, तस्मिन् हेतुभये, पञ्चमीतत्पुरुषः | भीस्म्योः षष्ठ्यन्तं, हेतुभये सप्तम्यन्तम् | **अनुदात्तङित आत्मनेपदम्** (१.३.१२) इत्यस्मात् **आत्मनेपदम्** इत्यस्य अनुवृत्तिः | **णेरणौ यत्कर्म णौ चेत् स कर्तानाधाने** (१.३.६७) इत्यस्मात् **णेः** इत्यनयोः अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **हेतुभये णेः भीस्म्योः आत्मनेपदम्** |

**अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) = आत्त्वं भवति चेत्, पुगागमः अपि विधीयते |

भी + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः → भै + इ → **बिभेतेर्हेतुभये** (६.१.५६) इत्यनेन ऐकारस्य आत्त्वम् → भा + इ → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) → भा + पुक् + इ → भापि इति णिजन्तधातुः → **भीस्म्योर्हेतुभये** (१.३.६८) इत्यनेन प्रयोजकात् साक्षात् भीतिः चेत् आत्मनेपदत्वम् → भापि + शप् + ते → भापयते

**भियो हेतुभये षुक्** (७.३.४०) = प्रयोजकात् साक्षात् भीतिः अस्ति चेत्, भी–धातोः अन्त्यस्य ईकारस्य स्थाने, आ–आदेशाभावे षुक्–आगमो भवति | इदं सूत्रं **अचो ञ्णिति** इत्यस्य बाधकसूत्रम् | षुकि ककार–उकारयोः इत्–संज्ञा लोपश्च, षकारः अवशिष्यते | हेतोर्भयं हेतुभयं, तस्मिन् हेतुभये पञ्चमीतत्पुरुषः| भी (भी धातुः) इति शब्दस्य षष्ठ्यन्तं रूपं भियः | भियः षष्ठ्यन्तं, हेतुभये सप्तम्यन्तं, षुक् प्रथमान्तं, त्रिपदमिदं सूत्रम् | **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इत्यस्मात् णौ इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **भियो हेतुभये षुक् णौ** |

भी + णिच् → भी + षुक् + इ → भी + ष् + इ → भीषि इति णिजन्तधातुः → भीषयते

अत्र प्रश्नः उदेति, **भियो हेतुभये षुक्** (७.३.४०) इति **अचो ञ्णिति** (७.२.११५) इत्यस्य अपवादभूतसूत्रं चेत्, कथं वा **अचो ञ्णिति** (७.२.११५) इति कदाचिदपि प्रवर्तेत ? उत्तरमेव यत् प्रयोजकाद्भयम् इति स्थितौ सदा **भियो हेतुभये षुक्** (७.३.४०) इत्येव भवति चेत्, **बिभेतेर्हेतुभये** (६.१.५६) इति सूत्रं निरवकाशं भविष्यति | **बिभेतेर्हेतुभये** (६.१.५६) इति विकल्पेन प्रवर्तते अतः प्रयोजकाद्भये सति एकवारम् **अचो ञ्णिति** (७.२.११५) + **बिभेतेर्हेतुभये** (६.१.५६) इति भवति, एकवारं **भियो हेतुभये षुक्** (७.३.४०) |

प्रयोजकात् साक्षात् भीतिः नास्ति चेत्, आ–आदेशो न भवति, न वा पुगागमः, न वा षुगागमः | तस्यां स्थितौ—

भी + णिच्  → अचो ञ्णिति → भै + इ → **एचोऽयवायावः** (६.१.७७) → भाय् + इ → भायि → भाययति

'छुरिकया बालकं भाययति' इत्यस्मिन् प्रयोजकात् साक्षात् भीतिः नास्ति अपि तु छुरिकायाः सः भीतः |

६) स्मि–धातुः

ष्मिङ् ईषद्धसने (ईषत् हसने) भ्वादिगणे | लटि स्मयते = to smile; प्रेरणार्थे स्माययति = to cause to smile |
परन्तु विस्मयः = आश्चर्यं, विस्मितिः, चमत्कारः |

**नित्यं स्मयतेः** (६.१.५७) = यदा प्रयोजकः विस्मयस्य साक्षात् कारणं, तदा नित्यम् एचः आकारादेशो भवति | नित्यत्त्वात् अत्र 'विभाषा' इत्यस्य अनुवृत्तिक्रमः समाप्यते | नित्यं प्रथमान्तं, स्मयतेः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **आदेच उपदेशेऽशिति** (६.१.४५) इत्यस्मात् **आत्, एच्** इत्यनयोः अनुवृत्तिः; **चिस्फुरोर्णौ** (६.१.५४) इत्यस्मात् **णौ** इत्यस्य अनुवृत्तिः; **बिभेतेर्हेतुभये** (६.१.५६) इत्यस्मात् **हेतुभये** इत्यस्य अनुवृत्तिः | अत्र भयशब्दः आश्चर्यार्थे स्वीक्रियते | अनुवृत्ति–सहितसूत्रम्— **हेतुभये नित्यं स्मयतेः एचः आत् णौ** |

विस्मि + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः → विस्मै + इ → **नित्यं स्मयतेः** (६.१.५७) इत्यनेन एचः आत्त्वम् → विस्मा + इ → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) → विस्मा + पुक् + इ → विस्मापि इति णिजन्तधातुः → **भीस्म्योर्हेतुभये** (१.३.६८) इत्यनेन प्रयोजकात् साक्षात् विस्मयः चेत् आत्मनेपदत्वम् → विस्मापि + शप् + ते → विस्मापयते (to surprise, astonish)

प्रयोजकात् विस्मयः चेत्—
मुण्डोजटिलो बालकं विस्मापयते | (The bald ascetic astonishes the boy.)
प्रयोजकात् विस्मयः नास्ति चेत्—
चोरः कुञ्चिकया एनं विस्माययति |

७) प्री–धातुः

प्रीञ् तर्पणे | अर्थः = प्रीतिं करोति, प्रसन्नं करोति, तृप्तं करोति | चुरादिगणे प्रीणयति/ते, प्राययति/ते, प्रयति/ते; क्र्यादिगणे प्रीणाति, प्रीणीते |

**धूञ्प्रीञोर्नुग्वक्तव्यः** इति वार्तिकम् | णिचि परे धू प्री इति धात्वोः नुक्–आगमः | धू–धातुः इति अग्रे उ/ऊकारान्तेषु दृश्यताम् | नुकि क्, उ, इत्यनयोः इत्–संज्ञा लोपश्च, न् अवशिष्यते |

प्रीञ् + णिच् → प्री + नुक् + इ → प्रीणि इति णिजन्तधातुः → प्रीणयति |

८) ईकारान्तधातूनां पुगागमः— ह्री, व्ली, री

ह्री जुहोत्यादिगणे | लटि जिह्रेति | अर्थः = लज्जते | णिचि ह्रेपयति = लज्जयति | ह्री इति स्त्रीलिङ्गशब्दः, लज्जा इत्यर्थः |

व्ली क्र्यादिगणे | **प्वादीनां ह्रस्वः** (७.३.८०) इत्यनेन शिति ह्रस्वत्वे, लटि व्लिनाति | अर्थः = गच्छति, समर्थनं करोति, चिनोति |

री क्र्यादिगणे | **प्वादीनां ह्रस्वः** (७.३.८०) इत्यनेन शिति ह्रस्वत्वे, लटि रिणाति | अर्थः = मोचयति |

**प्वादीनां ह्रस्वः** (७.३.८०) = पूञ्, लूञ्, धूञ्, ज्या, री, ली व्ली, प्ली, स्तॄञ्, कॄञ्, वॄ, शॄ, पॄ, वॄञ्, भॄ, मॄ, दॄ, जॄ, झॄ, धॄञ्, नॄ, कॄ, ॠ, गॄ, एषां धातूनां ह्रस्वत्वं भवति शिति प्रत्यये परे | पूः आदिर्येषां ते, प्वादयः बहुव्रीहिः, तेषां प्वादीनाम् | **येन विधिस्तदन्तस्य** (१.१.७२), **अलोऽन्त्यस्य** (१.१.५२), **अचश्च** (१.२.२८) इत्येभिः सूत्रैः एषां धातूनाम् अन्तिमस्वरस्य ह्रस्वादेशो भवति | प्वादीनां षष्ठ्यन्तं, ह्रस्वः प्रथमान्तं, द्विपदमिदं सूत्रम् | **ष्ठिवुक्लमुचमां शिति** (७.३.३५) इत्यस्मात् **शिति** इत्यस्य अनुवृतिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **प्वादीनाम् अचः अङ्गस्य ह्रस्वः शिति |**

**अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) अस्मिन् सूत्रे त्रयः ईकारान्तधातवः सूचिताः, ह्री, व्ली, री इति—
अर्ति**ह्रीव्लीरी**क्नूयीक्ष्माय्यातां पुङ् णौ **|** एभ्यः धातुभ्यः पुगागमः भवति णिच्–प्रत्यये परे | कोऽपि ईकारान्तधातुः अस्ति चेत् यः अस्मिन् सूत्रे न सूचितः, तर्हि णिच्–प्रत्यये परे तस्य पुगागमः न भवति एव | यथा नी + णिच् → नाययति (न तु नेपयति) |

धेयं यत् **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन न केवलं लघूपधस्य गुणः, अपि तु पुगन्तस्य अपि गुणः—

**पुगन्तलघूपधस्य च** (७.३.८६) = पुगन्तस्य अङ्गस्य लघूपधस्य च इकः गुणः भवति सार्वधातुके आर्धधातुके च प्रत्यये परे | पुक् अन्ते यस्य तत् पुगन्तम्, लघ्वी उपधा यस्य तत् लघूपधम् | पुगन्तञ्च लघूपधञ्च तयोः पुगन्तलघूपधं समाहारद्वन्द्वः, तस्य पुगन्तलघूपधस्य | पुगन्तलघूपधस्य षष्ठ्यन्तं पदम्, च अव्ययपदं, द्विपदमिदं सूत्रम् | **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः; **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यस्य पूर्णानुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **इको गुणवृद्धी** (१.१.३) इत्यनेन परिभाषा–सूत्रेण, **इकः** स्थानी भवति यत्र स्थानी नोक्तम् | अनुवृत्ति–सहितसूत्रम्— **पुगन्तलघूपधस्य च अङ्गस्य इकः गुणः सार्वधातुकार्धधातुकयोः** |

ह्री + णिच् → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) → ह्री + पुक् + णिच् → ह्री + प् + इ → ह्रीप् + इ → **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन गुणः → ह्रेप् + इ → **सनाद्यन्ता धातवः** इत्यनेन ह्रेपि इति णिजन्तधातुः → ह्रेपि + शप् + ति → ह्रेपयति
व्ली + णिच् → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** → व्ली + पुक् + णिच् → व्ली + प् + इ → व्लीप् + इ → **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन गुणः → व्लेप् + इ → व्लेपि → **सनाद्यन्ता धातवः** → व्लेपि + शप् + ति → व्लेपयति
री + णिच् → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** → री + पुक् + णिच् → री + प् + इ → रीप् + इ → **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन गुणः → रेप् + इ → रेपि → **सनाद्यन्ता धातवः** → रेपि + शप् + ति → रेपयति

९) <u>इण्–इक्–धातू</u>

इण् गतौ अदादिगणे | लटि एति, इतः, यन्ति इत्यादीनि रूपाणि |

**णौ गमिरबोधने** (२.४.४६) = णिचि परे इण्–धातुः गत्यर्थे न तु बोधनार्थे चेत्, गम् इति धात्वादेशो भवति | न बोधनम् अबधनं, नञ्तत्पुरुषः; तस्मिन् अबोधने | गमि–पदे इकारः उच्चारणार्थम् | णौ सप्त्यम्यन्तं, गमिः प्रथमान्तम्, अबोधने सप्तम्यन्तं, त्रिपदमिदं सूत्रम् |

**इणो गा लुङि** (२.४.४५) इत्यस्मात् **इणः** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **अबोधने इणः गमिः णौ** |

इण् गत्यर्थे + णिच् → **णौ गमिरबोधने** (२.४.४६) इत्यनेन गम् इति धात्वादेशः → गम् + इ → **अत उपधायाः** (७.२.११६) इत्यनेन उपधायाम् अतः वृद्धिः ञिति णिति प्रत्यये परे → गाम् + इ → गाम् इति अमन्तः इत्यस्मात् **जनीजॄष्वनसुरञ्जोऽमन्ताश्च** इति गणसूत्रेण मित्-संज्ञा → **मितां ह्रस्वः** (६.४.९२) इत्यनेन मित्-धातूनाम् उपधायाः स्वरः ह्रस्वः → गमि इति णिजन्तधातुः → गमयति

प्रति-उपसर्गपूर्वकः इण्-धातुः बोधनार्थे भवति—
प्रति + इ + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः → प्रति + ऐ + इ → **एचोऽयवायावः** (६.१.७७) इत्यनेन आय्-आदेशः → प्रति + आय् + इ → प्रति + आयि → **इको यणचि** इत्यनेन यण्-आदेशः → प्रत्यायि इति णिजन्तधातुः → प्रत्याययति

(एवं 'प्रत्ययः' इति शब्दः बोधनार्थे; प्रति + इ + अच्)

<u>इक्-धातुः</u>

इक्-स्मरणे अददिगणे, नित्यम् अधि-उपसर्गपूर्वकः | लटि अध्येति, अधीतः, अधियन्ति इत्यादीनि रूपाणि |

**इण्वदिकः** इति वार्तिकेन इक्-धातोः इण्वद्भावः | अनेन इण्-धातोः येन केनापि सूत्रेण यत् किमपि कार्यं भवति, तेनैव सूत्रेण इक्-धातोः अपि तदेव कार्यम् भवति | अतः **इणो यण्** (६.४.८१) इत्यनेन अजादि-प्रत्यये परे यण्-आदेशः इक्-धातोः अपि भवति; अत्र **णौ गमिरबोधने** (२.४.४६) इयनेन णिचि परे गत्यर्थे (अबोधने) गम् इति धात्वादेशः इक्-धातोः अपि भवति |

अधि + इक् + णिच् → अधि + इ + इ → **इण्वदिकः** इति वार्तिकेन इक्-धातोः इण्वद्भावः → **णौ गमिरबोधने** (२.४.४६) इत्यनेन गत्यर्थे गम् इति धात्वादेशः → अधि + गम् + इ → **अत उपधायाः** (७.२.११६) इत्यनेन उपधायाम् अतः वृद्धिः ञिति णिति प्रत्यये परे → अधि + गाम् + इ → गाम् इति अमन्तः इत्यस्मात् **जनीजॄष्वनसुरञ्जोऽमन्ताश्च** इति गणसूत्रेण मित्-संज्ञा → **मितां ह्रस्वः** (६.४.९२) इत्यनेन मित्-धातूनाम् उपधायाः स्वरः ह्रस्वः → अधि + गमि → अधिगमि इति णिजन्तधातुः → अधिगमयति

**C**. <u>उकारान्तधातवः ऊकारान्तधातवः च</u>

उ/ऊकारान्तधातूनां सामान्यव्यवस्था **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः, **एचोऽयवायावः** इत्यनेन आव् आदेशः |

भू + णिच् → भौ + इ → भावि इति णिजन्तधातुः → भावयति |

अत्र एक एव अपवादः—

धूञ् कम्पने चुरादिगणे | लटि धूनयति/ते, धावयति/ते, धवति/ते |

**धूञ्प्रीञोर्नुग्वक्तव्यः** इति वार्तिकेन णिचि परे धूञ् प्रीञ् इति धात्वोः नुगागमः |

धूञ् + णिच् → धू + नुक् + इ → धू + न् + इ → धूनि इति णिजन्तधातुः → धूनयति

**D. <u>ऋकारान्तधातवः</u> <u>ॠकारान्तधातवः</u> <u>च</u>**

१) <u>जागृ–धातुः</u>

**जाग्रोऽविचिण्णल्ङित्सु** (७.३.८५) = जागृ–धातोः गुणो भवति वि, चिण्, णल्, ङित् इत्येषां प्रत्ययाणां पर्युदासे | वि इति प्रत्ययविशेषः, चिण् इति लुङ्–लकारस्य, णल् इति लिट्–लकारस्य, ङित् इत्यनेन इत्–संज्ञकः ङकारः यस्य | वि, ङित् इत्यनयोः विषये गुणनिषेधः इदानीमपि भवति | चिण्, णल् इत्यनयोः विषये वृद्धिः इदानीमपि भवति | अन्यत्र सर्वत्र गुणः भवति एव | **अचो ञ्णिति** (७.२.११५), **क्क्ङिति च** (१.१.५) इत्यनयोः अपवादः | विश्च चिण् च णल् च ङित् च, तेषामितरेतरद्वन्द्वः विचिण्णल्ङितः, न विचिण्णल्ङितः अविचिण्णल्ङितः, तेषु अविचिण्णल्ङित्सु | जाग्रः षष्ठ्यन्तम्, अविचिण्णल्ङित्सु सप्तम्यन्तम् | **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **जाग्रः गुणः अविचिण्णल्ङित्सु** |

जागृ + णिच् → **अचो ञ्णिति** (७.२.११५) इति प्रबाध्य **जाग्रोऽविचिण्णल्ङित्सु** (७.३.८५) इत्यनेन गुणः → जागर् + इ → जागरि इति णिजन्तधातुः → जागरयति

२) <u>दॄ–नॄ–जॄ–धातवः</u>

इमे त्रयः धातवः मितः अतः उपधायां स्थितस्य अचः ह्रस्वत्वं भवति **मितां ह्रस्वः** (६.४.९२) इति सूत्रेण |

**दॄ भये** क्र्यादिगणे | लटि दृणाति | अर्थः = विदारयति, बिभेति | यदा भयार्थे अस्ति, तदा घटादिगणे पठितः अतः णिचि **मितां ह्रस्वः** इत्यनेन उपधायां स्थितस्य अचः ह्रस्वत्वम् | अतः णिचि भये दरयति, अन्यार्थेषु दारयति इति |

**नॄ नये** क्र्यादिगणे | लटि नृणाति | अर्थः = to bring to; to lead | यदा नयनार्थे (प्रापणार्थे) अस्ति, तदा घटादिगणे पठितः अतः णिचि **मितां ह्रस्वः** इत्यनेन उपधायां स्थितस्य अचः ह्रस्वत्वम् | अतः णिचि नये नरयति, अन्यार्थेषु नारयति इति |

**जॄ** धातुः भ्वादिगणे, दिवादिगणे, क्र्यादिगणे च | लटि जरति, जीर्यति, जृणाति | अर्थः = 1.to grow old; 2.to perish (fig. also); 3.to be dissolved or digested; 4.to break up or fall to pieces | घटादिगणे णिचि **मितां ह्रस्वः** इत्यनेन उपधायां स्थितस्य अचः ह्रस्वत्वम् | अतः णिचि विकल्पेन जरयति अपि जारयति अपि |

दॄ + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः → दार् + इ → दारि → **मितां ह्रस्वः** → दरि इति णिजन्तधातुः → दरयति
नॄ + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः → नार् + इ → नारि → **मितां ह्रस्वः** → नरि इति णिजन्तधातुः → नरयति
जॄ + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः → जार् + इ → जारि → **मितां ह्रस्वः** → जरि इति णिजन्तधातुः → जरयति

३) <u>स्मृ–धातुः</u>

**स्मृ आध्याने** भ्वादिगणे | लटि स्मरति | अर्थः = स्मरति; जपं करोति, ध्यानं करोति; अभिलेखे लिखति, स्मृतौ लिखति; उपदिशति, घोषते; पाठयति | आध्यानार्थे अस्ति चेत् मित् अतः णिचि **मितां ह्रस्वः** इत्यनेन उपधायां स्वरः ह्रस्वः |

आध्यानार्थे—

स्मृ + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः → स्मार् + इ → स्मारि → **मितां ह्रस्वः** → स्मरि इति णिजन्तधातुः → स्मरयति

अपरेषु अर्थेषु—

स्मृ + णिच् → **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः → स्मार् + इ → स्मारि इति णिजन्तधातुः → स्मारयति

४) <u>ऋकारान्तधातूनां पुगागमः</u>

ऋ गतिप्रापणयोः भ्वादिगणे | लटि ऋच्छति | **पा–घ्रा–ध्मा–स्था–म्ना–दाण्–दृशि–अर्ति–सर्ति–शद–सदां, पिब–जिघ्र–धम–तिष्ठ–मन–यच्छ–पश्य–ऋच्छ–धौ–शीय–सीदाः** (७.३.७८) इत्यनेन शिति परे ऋ–स्थाने **ऋच्छ** इति धात्वादेशो भवति | अर्थः = गच्छति; गन्तव्यस्थानं प्राप्नोति; लभते | णिचि अर्पयति = गमयति, क्षेपयति |

**अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इति सूत्रेण ऋ–धातोः अपि पुक्–आगमो भवति णिचि परे | **अर्ति**ह्रीव्लीरीक्नूयीक्ष्माय्याताम् इति |

**पुगन्तलघूपधस्य च** (७.३.८६) = पुगन्तस्य अङ्गस्य लघूपधस्य च इकः गुणः भवति सार्वधातुके आर्धधातुके च प्रत्यये परे | पुक् अन्ते यस्य तत् पुगन्तम्, लघ्वी उपधा यस्य तत् लघूपधम् | पुगन्तञ्च लघूपधञ्च तयोः पुगन्तलघूपधं समाहारद्वन्द्वः, तस्य पुगन्तलघूपधस्य | पुगन्तलघूपधस्य षष्ठ्यन्तं पदम्, च अव्ययपदं, द्विपदमिदं सूत्रम् | **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः; **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यस्य पूर्णानुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **इको गुणवृद्धी** (१.१.३) इत्यनेन परिभाषा–सूत्रेण, **इकः** स्थानी भवति यत्र स्थानी नोक्तम् | अनुवृत्ति–सहितसूत्रम्— **पुगन्तलघूपधस्य च अङ्गस्य इकः गुणः सार्वधातुकार्धधातुकयोः** |

ऋ + णिच् → **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** → ऋ + पुक् + णिच् → ऋ + प् + इ → ऋप् + इ → **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन गुणः → अर्प् + इ → **सनाद्यन्ता धातवः** इत्यनेन अर्पि इति णिजन्तधातुः → अर्पि + शप् + ति → अर्पयति

इति अजन्तधातूनां विशेषणिजन्तरूपाणि | अग्रे हलन्तधातूनां विशेषणिजन्तरूपाणि परिशील्यन्ते |

Swarup – May 2013 (Updated April 2017)